## हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। (८१/१४६१)

हेतुभ्यो मनुष्येभ्यश्च अन्यतरस्यां रूप्यः प्रत्ययो भवति तत आगतः इत्येतस्मिन् विषये। मनुष्यग्रहण-महेत्वर्थम्। हेतुः कारणम्। हेतुभ्यस्तावत् – समादागतम् [1]समरूप्यम्, समीयम्। [2]विषमरूप्यम्, विषमीयम्। गहादित्वाच्छः (४.२.१३८/१३६२)। मनुष्येभ्यः – देवदत्तरूप्यम्। यज्ञदत्तरूप्यम्। [3]दैवदत्तम्। याज्ञदत्तम्। बहुवचनं स्वरूपविधिनिरासार्थम्॥

## मयट् च। (८२/१४६२)

हेतुभ्यो मनुष्येभ्यः च मयट् प्रत्ययो भवति ततः आगतः इत्येतस्मिन् विषये। सममयम्। विषममयम्। मनुष्येभ्यः – देवदत्तमयम्। यज्ञदत्तमयम्। टकारो ङीबर्थः। सममयी[4]। योगविभागो यथासङ्ख्य[5]निरासार्थः॥

## प्रभवति। (८३/१४६३)

ततः इत्येव। पञ्चमीसमर्थात् [6]ङ्याप्प्रातिपदिकात् प्रभवति इत्येतस्मिन् [7]विषये यथाविहितं प्रत्ययो भवति। प्रभवति प्रकाशते, प्रथमत उपलभ्यते इत्यर्थः। हिमवतः प्रभवति हैमवती गङ्गा। दारदी सिन्धुः॥

## विदूराञ् ञ्यः। (८४/१४६४)

विदूरशब्दात् ञ्यः प्रत्ययो भवति ततः प्रभवति इत्येतस्मिन् [8]विषये। अणोऽपवादः। विदूरात् प्रभवति वैदूर्यो मणिः। ननु च वालवायादसौ प्रभवति, न विदूरात्, तत्र तु संस्क्रियते? एवं तर्हि –

वालवायो विदूरं च प्रकृत्यन्तरमेव वा।
न वै तत्रेति चेद् ब्रूया[9]ज्जित्वरीवदुपाचरेत् (म. भा. २.३१३)॥

## तद्गच्छति पथिदूतयोः। (८५/१४६५)

तद् इति द्वितीयासमर्थाद् गच्छति इत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति, [10]योऽसौ गच्छति पन्थाश्चेत् स भवति दूतो वा। स्रुघ्नं गच्छति स्रौघ्नः [11]पन्था दूतो वा। माथुरः[12]। तत्स्थेषु गच्छत्सु पन्था गच्छति इत्युच्यते। अथ वा स्रुघ्न[13]प्राप्तिः पथो गमनम्। पथिदूतयोः इति किम्? स्रुघ्नं गच्छति सार्थः॥

---

1. सामरूप्यम् ह. 2. विषमरूप्यम् नास्ति फ. 3. देवदत्तम् यज्ञदत्तम् ह. 4. विषयमयी इत्यधिकम् इ. फ. 5. °निरासार्थम् फ. 6. ङ्याप् नास्ति फ. 7. अर्थे ब. क. फ. ह. 8. अर्थे ह. 9. जित्वरीय-मुपाचरेत् क. 10. असौ नास्ति इ. 11. स्रौघ्नः दूतः ब. क. ड. ह. 12. राष्ट्रीयः इत्यधिकम् ह, राष्ट्रियः इत्यधिकम् ब. क. ड, अवारपारीणः इत्यधिकम् ड. 13. स्रुघ्नप्राप्तिफलम् ड.